षयोः सेकः सर्पिषा च तथाप्यति" । इति गजायुर्वेदः

अथाश्वायुर्वेदः तत्रैव "अश्ववाहनसारं च वक्ष्येऽश्वस्य चिकित्सितम्" इत्युपक्रम्य "इषो निम्बवृहत्यौ च गुडुची च समाक्षिका । सिंहानकहरी पिण्डी स्वेदश्च शिरसस्तथा । हिङ्गुपुष्करमूलञ्च नागरं साम्लवेतसम् । पिप्पलीसैन्धवयुतं शूलघ्नमुष्णवारिणा । नागराऽतिविषा मुस्ता सानन्ता विल्वमालिका । क्वाथमेषां पिबेद्वाजी सर्व्वातीसारनाशनम् । प्रियङ्गुलोध्रमधुभिः पिबेद्वृषरसं हयः । क्षीरं वा पञ्चकोलाढ्यं कासनाद्विप्रमुच्यते । विष्कन्धेषु च सर्व्वेषु श्रेय आदौ विशोषणम् । अभ्यङ्गावतनिस्नेहनस्यवर्त्तिक्रमःस्तुतः । त्वरितानां तुरङ्गाणां पयसैव क्रियाक्रमः । लोध्रकरञ्जयोर्मूलं मातुलाङ्गाग्निनागराः । कुष्ठं हिङ्गु वचा रास्ना लेपोऽयं शोथनाशनः । मञ्जिष्ठा मधुकं द्राक्षावृहत्यौ रक्तचन्दनम् । त्रपुषीवीजमूलानि शृङ्गाटककशेरुकम् । अजापयःशृतमिदं सशीतं शर्कराान्वितम् । पीत्वा निरशनोवाजी रक्तमेहात् प्रमुच्यते । मन्याहनुनिगालस्थशिरःशोफोगलग्रहः । अभ्यङ्गः कटुतैलेन तत्र तेष्वेव शस्यते । प्रत्यक्पुष्पी तथा वह्निः सैन्धवं सौरसो रसः। कृष्णाहिङ्गुयुतैरेभिः कृत्वा नस्यं न सीदति । निशे ज्योतिष्मती पाठा कृष्णाकुष्ठं वचा मधु । जिह्वास्तम्भे च लेपोऽयं गुड़मूत्रयुतोहितः । तिलैर्यष्ट्या रजन्या च निम्बपत्रैश्च योजिता । क्षौद्रेण शोधनी पिण्डी सर्पिषा व्रणरोपणी । अभिघातेन खञ्जन्ति येऽप्यश्वास्तीव्रवेदनाः। परिषेकक्रिया तेषां तैलेनाशु रुजापहा । दोषकायाभिघाताभ्यां तनुजे लिङ्गिते तथा । शान्तिर्मत्स्याम्बुवस्ताभ्यां पक्वमन्नमथ क्रमात् । अश्वत्थोडुम्बरप्लक्षमधूकवटवल्कलैः । प्रभूतनलिकाक्वाथः सुखोष्णो व्रणशोधनः । शताह्वा नागरं रास्नामञ्जिष्ठाकृष्णासैन्धवैः देवदारुवचायुग्मरजनीरक्तचन्दनैः । तैलं सिद्धं कषायेण गुडुच्या पयसा सह । म्रक्षणं वस्तिनस्ये च योज्यं सर्व्वत्र लिङ्गिते । रक्तस्रावो जलौकाभिर्नैवान्ते पित्तरोगिणः । खादिरोडुम्बराश्वत्थकषायेण च साधितम् । धात्रीदुरालभातिक्ताप्रियङ्गुकुसुमैःसमैः । गुडुच्या च कृतः क्वाथः कल्कोयुक्तो विलम्बिते। उत्पाते शिशिरे श्राव्ये मुष्कशोथे तथैव च । त्रिप्रकारिणि दोषे च सद्योवेधनमिष्यते । गोशकृत्सर्ज्जिकाकुष्ठरजनीतिलसर्षपैः । गवां मूत्रेण पिष्टैश्च मर्द्दनं कण्डुनाशनम् । शीतोमधुयुतः क्वाथो नासिकायां सशर्करः। रक्तपित्तहरः पानादश्वकण्डोस्तथैव च । सप्तमे सप्तमे देयमश्वानां लवणं दिने । तथा भुक्तवतां देया अतिपाते तु वारुणी । जीवनीयैः समधुरैर्मृद्वीकाशर्करायुतैः । सर्पिपिप्पलीकैः शरदि प्रति पानं सपद्मकैः । विडङ्गपिप्पलीधान्यशताह्वालोध्रसैन्धवैः । सचित्रकैस्तुरङ्गाणां प्रतिपानं हिमागमे । लोध्रप्रियङ्गुकायुक्ता पिप्पली विश्वभेषजैः । सक्षौद्रैः प्रतिपानं स्याद्वसन्ते कफनाशनम् । प्रियङ्गुपिप्पलीलोध्रयष्ट्याह्वैः समहौषधैः । निदाघे सगुड़ा देया मदिरा प्रतिपानके । लोध्रकाष्ठं सलवणं पिप्पल्योविश्वभेषजम् । भवेत्तैलयुतैरेभिः प्रतिपानं घनागमे । निदाघेऽर्द्धकृताहाराः शरत्सु पुष्टशोणिताः । प्रावृड्भिन्नपुरीषाश्च पिबेयुर्वाजिनोघृतम् । पिबेयुर्वाजिनस्तैलं कफवाय्वधिकास्तु ये । स्नेहव्यापद्भवो येषां तेषां कार्य्यं विरूक्षणम् । त्र्यहं यवागूरूक्षा स्याद्भोजनं तक्रसंयुतम् । शरन्निदाघयोः सर्पिस्तैलं शीतवसन्तयोः । वर्षासु शिशिरे चैव वस्तौ यमकमिष्यते । गुर्व्वभिष्यन्दिभक्तानि व्यायामं स्नानमातपम् । वायुवर्षञ्च वाहस्य स्नेहनीयस्य वर्ज्जयेत् । स्नानं पानं सकृत्दृष्टमश्वानां सलिलागमे । अत्यर्थं दुर्द्दिने काले पानमेकं प्रशस्यते । युक्तं शीतातपे काले द्विः पानं प्लवनं सकृत् । ग्रीष्मे त्रिः स्नानपानं स्याच्चिरं तस्यावगाहनम् । निस्तुषाणाम्प्रदातव्या यवानाञ्चतुराढकी । चणकव्रीहिमौद्गाणां, कलायान् वापि दापयेत् । अहोरात्रेण वाहस्य यवसस्य तुला दश । अष्टौ शुष्कस्य दातव्या चतस्रोऽथ वुषस्य वा। दूर्व्वा पित्तं, यवः कासं, वुषश्च श्लेष्मसंक्षयम् । नाशयत्यर्जुनःश्वासं, तथा शालिर्बलक्षयम् । वातिकाः पैत्तिकाश्चैव श्लेष्मजाः सान्निपातिकाः। न रोगा पीड़यिष्यन्ति दूर्व्वाहारं तुरङ्गमम् । द्वौ रज्जुबन्धौ दुष्टानां पक्षयोरुभयोरपि । पश्चाद्बन्धश्च कर्त्तव्यो दूरकीलव्यपाश्रयः। वसेयुस्त्वास्तृते स्थाने कृतधूपनभूमयः । वनोपन्यस्तयवसाः सप्रदीपाः सुरक्षिताः । कृतबन्धाश्च कपयोधार्य्याश्चाश्वगृहे मृगाः" इत्यश्वायुर्वेदः अधिकं जयदत्तकृतेऽश्वशास्त्रे द्रष्टव्यम् ।

अथ गवायुर्वेदः अग्निपु० 'गवाम्माहात्म्यमुक्तं हि चिकित्साञ्च तथा शृणु" इत्युपक्रम्य । 'शृङ्गामयेषु धेनूनां तैलं दद्यात् ससैन्धवम् । शृङ्गवेरबलामांसीकल्कसिद्धं समाक्षिकम् । कर्णमूलेषु शूलेषु मञ्जिष्ठाहिङ्गुसैन्धवैः । सिद्धं तैलं प्रदातव्यं रसोनेनाथ वा पुनः । विल्वमूलमपामार्गो धातकी च सपाटला । कुटजं दन्तमूलेषु लेपोहृच्छूलनाशनः । दन्तमूलहरैर्द्रव्यैर्घृतं